# धूर्तशृगालः

एकदा एकः काकः अतीव बुभुक्षितः असीत्। सः भूमौ एकं मांसखण्डम् अपश्यत्। सः तं मांसखण्डम् गृहीत्वा वृक्षस्य शाखायाम् उपाविशत्। तदा कश्चित् शृगालः काकस्य मुखे मांसखण्डम् दृष्ट्वा लुब्धः अभवत्। शृगालः तु स्वभावेन एव धूर्तः। सः वृक्षस्य समीपम् अगच्छत् अचिन्तयत् च – "अहो! सरसः अयं मांसखण्डः। अहं केन प्रकारेण इमं ग्रहीष्यामि? अतः सः शाठ्येन काकम् अकथयत्,

"भो विहगराज अपूर्वं तव लावण्यम्। त्वादृशं विहगं पूर्वं न अपश्यम्। तव स्वरः तु अतीव मधुरः अहं तु अत्र तव गीतस्य श्रवणाय आगच्छम्।"

काकः स्वमिथ्या स्तुतिं श्रुत्वा अतीव प्रमुदितः अभवत्। सः तस्यां शाखायाम् इतस्ततः अनृत्यत्। तदा शृगालाः तम् अवदत् – “अहो! तव नृत्यम् अपि मनोहरम्। तव गीतम् तु सत्यमेव कोकिलस्य गीतात् अपि मधुरतरं भवेत्।”

स्वप्रशंसया पुलकितः काकः गानाय प्रवृत्तः अभवत्। तदा मांसखण्डः तस्य मुखात् भूमौ अपतत्। शृगाालः तं मांसखण्डं गृहीत्वा वनं प्रति अधावत्।